## ॥ संस्कर्तृमङ्गलाचरणम् ॥

ॐ नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासम्प्रदायकर्तृभ्यः
परमर्षिभ्यो नमो महद्भ्यो नमो गुरुभ्यः ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
वाक्यकारम् वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तु कामस्सनकादि सिद्धान् एतद्विमर्शे **शिवसूत्र**जालम् ।

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च **सूत्रं** सूत्रविदो विदुः ॥
उक्तानुक्तदुरुक्तार्थ व्यक्ति (चिन्ता) कारि तु **वार्तिकम्** ।
सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपादानि च वर्ण्यन्ते **भाष्यं** भाष्यविदो विदुः ॥